किं वानेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं
किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्।
ज्ञात्वैतत्क्षणभङ्गुरं सपदि रे त्याज्यं मनो दूरतः
स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥ १२॥

(श्रीमच्छङ्कराचार्यविरचितं श्रीशिवापराधक्षमापनस्तोत्रम्)

पदच्छेदः – किं वा अनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं, किं वा पुत्रकलत्रमित्रपशुभिः देहेन गेहेन किम्। ज्ञात्वा एतत् क्षणभङ्गुरं सपदि रे त्याज्यं मनः दूरतः स्व-आत्मार्थं गुरुवाक्यतः भज भज श्रीपार्वतीवल्लभम्

अन्वयः – अनेन धनेन वाजिकरिभिः वा किम्? राज्येन प्राप्तेन किम्? अथवा प्राप्तेन राज्येन किम्? पुत्रकलत्रमित्रपशुभिः किम्? देहेन गेहेन वा किम्? एतत् क्षणभङ्गुरं ज्ञात्वा सपदि दूरतः त्याज्यम् । रे मनः ! गुरुवाक्यतः स्वात्मार्थं श्रीपार्वतीवल्लभं भज भज ।

व्याख्या – अनेन धनेन वाजिकरिभिः वा किम्? अर्थात् एतेन धनेन नाम सम्पदा द्रव्येण वा किं प्रयोजनम्? वाजिभिः करिभिः नाम अश्वैः गजैः वा किं प्रयोजनम्? इत्युक्ते एतेन धनेन मम किं प्रयोजनम्, एतैः पशुभिः मम किं प्रयोजनम्? अर्थात् एतेने धनेन मम प्रयोजनं नास्ति । एतैः पशुभिः अपि मम प्रयोजनं नास्ति । एतेन प्राप्तेन राज्येन किम्? इत्युक्ते एतत् यद् राज्यं मया प्राप्तम् अधिगतं वा तेन किं प्रयोजनम्? पुत्र-कलत्र-मित्र-पशुभिः वा किम्? अर्थात् मम पुत्रेण नाम आत्मजेन, सुतेन वा किम् आवश्यकम्? कलत्रेण नाम भार्यया, पत्न्या, जायया वा किं प्रयोजनम् ? मित्रेण नाम सख्या, सुहृदा, बन्धुना, स्नेहितेन वयस्येन वा किं प्रयोजनम् ? पशुना नाम गृहे पालितैः कुक्कुर-मार्जार-गो-बलीवर्दादिभिः

पशुभिः वा किं प्रयोजनम्? अनेन मम देहेन नाम कायेन शरीरेण वा किं प्रयोजनम्? गेहेन अर्थात् गृहेण वासेन वा किं प्रयोजनम्? एतत् सर्वं क्षणभङ्गुरं ज्ञात्वा दूरतः त्याज्यम् अर्थात् एतत् उपरि चर्चितं वर्णितं लिखितं वा सर्वं वस्तु क्षणभङ्गुरं नाम अलीकं क्षणिकं नश्वरं अशाश्वतं अल्पकालिकं वा भवति । अतः एतत् ज्ञात्वा बुद्ध्वा अवगम्य सम्यग् विचार्य वा सपदि नाम सहसा अचिरेण शीघ्रं झटिति वा दूरतः अर्थात् दूरात् त्याज्यं अर्थात् त्यक्तव्यं भवति । एतानि सर्वाणि वस्तुनि क्षणिकानि नश्वराणि अल्पकालिकानि वा इति विचार्य दूरात् एतानि सर्वाणि त्यक्तव्यानि भवन्ति । एतानि सर्वाणि त्यक्त्वा ततःपरं, रे मनः ! रे मूढमनः ! रे अज्ञानि नर ! रे मन्दमते नर ! रे मन्दबुद्धे नर ! गुरुवाक्यतः गुरुवाक्यानुसारं गुरुवचनानुसारं गुरोः उपदेशानुसारं गुरोः उपदेशेन वा स्वात्मार्थं नाम स्वकीयस्य आत्मनः कृते स्वकीयस्य आत्मनः मुक्त्यर्थं स्वकीयस्य आत्मनः मोक्षार्थं मोक्षप्राप्त्यर्थं वा श्रीपार्वतीवल्लभं अर्थात् पार्वतीदेव्याः प्रियं पतिं स्वामिनं ईश्वरं श्रीपरमेश्वरं सदाशिवं महादेवं वा भज भजस्व सेवस्व पूजय वा । भज पुनरपि भजस्व । अर्थात् वारं वारं श्रीसदाशिवस्य भजनं कुरु सेवां कुरु पूजां कुरु इति । अन्यथा एतस्मात् क्षणभङ्गुरात् संसारात् एतेभ्यः क्षणिकेभ्यः पार्थिवेभ्यः वस्तुभ्यः वा तव मुक्तिर्नास्ति । श्रीपार्वतीवल्लभः श्रीपरमेश्वरः महादेवः तव मुक्तिं विधास्यति विधातुं वा शक्ष्यति । अतः वारं वारं अहर्निशं तं भज जप पूजय वा इत्यर्थः ॥ सुभाषितमिदं शार्दूलविक्रीडितम् इति छन्दसा विरचितमस्ति ।